**Roll No. ...................................**

# E–3388

## B. A. (Classics) (Part II)

## EXAMINATION, 2021

SAHITYAM

**(Optional)**

Paper First

*Time : Three Hours* ] [ *Maximum Marks : 75*

सूचना : सर्वे प्रश्नाः समाधेयाः।

1. केषाञ्चित् त्रयाणां अलङ्काराणां सोदाहरणं व्याख्या प्रस्तोतव्या—

24

(i) यमकालङ्कारः

(ii) छेकानुप्रासः अलङ्कारः

(iii) उत्प्रेक्षालङ्कारः

(iv) अर्थापत्ति अलङ्कारः

(v) दीपकालङ्कारः

(vi) विशेषोक्तिः अलङ्कारः

(vii) विभावनालङ्कारः

2. कयोश्चिद् द्वयोः विवेचनं कार्याः— 16

(i) रसस्वरूपम्

(ii) करुणरसः

(iii) व्यञ्जनास्वरूपम्

(iv) अगूढाख्यं गुणीभूतव्यङ्ग्म्

(v) लक्षणास्वरूपम्

(vi) अभिधास्वरूपम्

3. कयोश्चिद् द्वयोः गद्यखण्डयोः व्याख्या उपास्थापनीया— 20

(i) कथमिवैनमनुरक्ता मादृशेषु अपि पुरुषसिंहेषु सावमाना पापेयमवन्तिसुन्दरी। पश्यतु पतिमद्यैव शूलावतं सितम् इयं अनार्यशीला कुलपांसनी इति निर्भर्त्सयन् भीषणभ्रुकुटिदूषितललाटः काल इव काललोहदण्डेन अवलम्ब्य हस्ताम्बुजे रेखाम्बुज-रथाङ्गलाञ्छने राजपुत्रं सरभसमाचकर्ष।

(ii) चम्पेश्वरोऽपि सिंह वर्मा सिंह इव असह्यविक्रमः प्राकारं भेदयित्वा महता बलसमुदायेन निर्गत्य स्वप्रहितदूतव्राताहूतानां साहाय्यदानायाति सत्वरम् आपततां धरापतीनाम् अचिरकालभाविन्यपि सन्निधावदत्तापेक्षः साक्षादिवालेपो वपुष्मानक्षरमापरीतः प्रतिबलं प्रतिजग्राह।

(iii) तस्मिन्नेव क्षणान्तरे 'हतो हतश्चण्डवर्मा सिंहवर्मदुहितुः अम्बालिकायाः पाणिस्पर्शरागप्रसारिते बाहुदण्ड एव बलवदवलम्ब्य सरभसमाकृष्य केनापि दुष्करकर्मणा तस्करेण नखप्रहारेण राजमन्दिरोद्‌देशं च शवशतमयम् आपादयन्नचकितगतिरसौ विहरति' इति वाचः समभवन्।

(iv) अनन्तरं च कश्चित्कर्णिकागौरः कुरुविन्दसवर्णकुन्तलः कमलकोमलपाणिपादः कर्णचुम्बिदुग्धधवलस्निग्धनीललोचनः कटितटनिविष्टरत्ननखः पट्टनिवसनः कृशाकृशोदरोरः स्थलः कृतहस्ततया रिपुकुलम् इषुवर्षेणाभिवर्षन्पादाङ्गुष्ठनिष्ठुराव-घृष्टमूलेन प्रजविना गजेन सन्निकृष्य पूर्वोपदेशप्रत्ययात् 'अयं एव राजवाहनः' इति।

4. 'दण्डिनः पदलालित्यम्' इत्युक्तिः समीक्ष्यताम्। 15

अथवा

दशकुमारचरितस्य वैशिष्ट्यं प्रस्तूयताम्।

अथवा

दशकुमारचरितानुसारेण राजवाहनस्य चरित्रं उपस्थापयत।